**M.A. 1st Semester Examination, 2023**

**SANSKRIT (PG)**

PAPER – SAN-104

Full Marks : 40 Time : 2 hours

*The figures in the right-hand margin indicate marks.*
*Canditates are required to give their answers in their own words as far as practicable.*
*Illustrate the answers wherever necessary.*

**सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च प्रदेयम्।**

**1. यथाकामं प्रश्नचतुष्टयं समाधत्त।** 2x4=8

i) उत्तररामचरितस्य अङ्गिरस: क: ? अस्मिन् नाटके तृतीयाङ्कस्य नाम किम् ?

ii) अष्टावक्र: क: ? शम्बूक: क: ?

iii) लक्ष्मणपुत्रस्य नाम किम्? तस्य सारथे: नाम किम्?

iv) ब्रह्मास्वादसहोदर: क:? कविराज-विश्वनाथ: कति रसान् स्वीकरोति?

v) कस्य स्थायिभाव: रति:? अभिज्ञानशकुन्तलम् इति नाटकस्य मुख्यरस: क:?

vi) हास्यरसाश्रितस्य व्यायोगस्य नाम किम्? रौद्ररसाश्रितस्य डिमस्य नाम किम्?

**2. यथानिर्देशं समाधत्त।**

**क. यथेच्छं द्वौ उत्तरत।** 4x2=8

i) उत्पत्तिपरिपूताया: किमस्या: पावनान्तरै:।
तीर्थोदकश्च वह्निश्च नान्यत: शुद्धिमर्हत:।।

ii) विनिश्चेतुं शक्यो न सुखमिति वा दु:खमिति वा
प्रमोहो निद्रा वा किमु विषविसर्प: किमु मद:।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो

विकारश्चैतन्यं भ्रमयति च सम्मीलयति च।।

iii) अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः।
पुटपाकप्रतीकाशोरामस्यकरुणोरसः।।

**ख. यथेच्छं द्वौ उत्तरत।** 4x2=8

i) शृङ्गाररसस्य लक्षणोदाहरणे निरूपयत।

ii) करुणरसस्य लक्षणोदाहरणे आलोचयत।

iii) रौद्ररसस्य लक्षणोदाहरणे आलोचयत।

**3. यथानिर्देशं उत्तरत।** 8x2=16

i) उत्तररामचरितमिति नाटकस्य द्वितीयाङ्के विष्कम्भकस्य नाटकीयतात्पर्यमालोचयत।

अथवा,

उत्तररामचरितनाटकावलम्बनेन "रामस्य" चरित्रमालोचयत।

ii) भरतमते रसाः स्थायिभावाश्च आलोच्यन्ताम्।

अथवा,

भट्टनायकमतेन रसस्वरूपमालोच्यताम्।